संवर कार

श्रीगणेशाय नमः ॥ भार्गवराम प्रसन्न ॥ अथशिक्षांप्रवक्ष्यामिपाणिनीयंमतंयथा ॥ शास्त्रानुपूर्वंतद्विद्याद्यथोक्तं
लोकवेदयोः ॥ प्रसिद्धमपिशब्दार्थमविज्ञातमबुद्धिभिः ॥ पुनर्व्यक्तीकरिष्यामिवाचउच्चारणेविधिं ॥ त्रिषष्टिश्चतुःषष्टि
र्वावर्णाः शंभुमतेमताः ॥ प्राकृतेसंस्कृतेचापिस्वयंप्रोक्ताःस्वयंभुवा ॥ स्वराविंशतिरेकश्चस्पर्शानांपंचविंशतिः ॥ या
दयश्चस्मृताह्यष्टौचत्वारश्चयमाःस्मृताः ॥ अनुस्वारोविसर्गश्चᳲकᳲपौचापिपराश्रितौ ॥ दुःस्पृष्टश्चेतिविज्ञे
यो ऌकारःप्लुतएवच ॥ ५ ॥ १ ॥ आत्माबुद्ध्यासमेत्यार्थान्मनोयुंक्तेविवक्षया । मनःकायाग्निमाहंतिस
प्रेरयतिमारुतं । मारुतस्तूरसिचरन्मंद्रंजनयतिस्वरं । प्रातःसवनयोगंतंछंदोगायत्रमाश्रितं । कंठेमा
ध्यंदिनयुगंमध्यमंत्रैष्टुभानुगं । तारंतार्तीयसवनंशीर्षण्यंजागतानुगं । सोदीर्णोमूर्ध्न्यभिहतोवक्त्रमा
पद्यमारुतः । वर्णान्जनयतेतेषांविभागःपंचधास्मृतः । स्वरतःकालतःस्थानात्प्रयत्नानुप्रदानतः ।

ता॰ इतिवर्णविदःप्राहुर्निपुणंतंनिबोधत॥१३॥उदात्तश्चानुदात्तश्चस्वरितश्चस्वरास्त्रयः।ह्रस्वोदी
र्घःप्लुतइतिकालतोनियमाअचि॥उदात्तेनिषादगांधारावनुदात्तऋषभधैवतौ।स्वरितप्रभवाह्येते
षड्जमध्यमपंचमाः।अष्टौस्थानानिवर्णानामुरःकंठःशिरस्तथा।जिह्वामूलंचदंताश्चनासिकौष्ठौचता
लुच।ऊभावश्चविवृतिश्चशषसारेफएवच।जिह्वामूलमुपध्माचगतिरष्टविधोष्मणः।यद्योभावप्र
संधानमुकारादिपरंपदं।स्वरांतंतादृशंविद्याद्यदन्यद्व्यक्तमूष्मणः॥१५॥३॥हकारंपंचमैर्युक्तमं
तस्थाभिश्चसंयुतं।औरस्यंतंविजानीयात्कंठ्यमाहुरसंयुतं।कंठ्यावहाविचुयशास्तालव्याओ
ष्ठजावुपू।स्युर्मूर्धन्याऋटुरषादंत्याऌतुलसाःस्मृताः।जिह्वामूलेतुकुःप्रोक्तोदंत्योष्ठ्योवःस्मृतोबु
धैः।एऐतुकंठतालव्याओऔकंठोष्ठजौस्मृतौ॥अर्धमात्रातुकंठ्यस्यादेकारैकारयोर्भवेत्।ओ

कारौकारयोर्मात्रा तयोर्विवृतसंवृतं । संवृतं मात्रकं ज्ञेयं विवृतं तु द्विमात्रकं । घोषा वा संवृताः सर्वे अ
घोषा विवृताः स्मृताः ॥२०॥५॥ स्वराणामूष्मणां चैव विवृतं करणं स्मृतं । तेभ्योपि विवृता वेङौ ताभ्यामैचौ
तथैव च । अनुस्वारयमानां च नासिकास्थानमुच्यते । अयोगवाहा विज्ञेया आश्रयस्थानभागिनः । अ
लाबुवीणानिर्घोषो दंत्यमूल्यः स्वरानुगः । अनुस्वारस्तु कर्तव्यो नित्यं ह्नोः शषसेषु च । अनुस्वारे वि
वृत्यां तु विरामे चाक्षरद्वयो । द्विरोष्ठ्यौ तु विगृह्णीयाद्यत्रोकारवकारयोः । व्याघ्री यथा हरेत्पुत्रान्दं
ष्ट्राभ्यां न च पीडयेत् । भीता पतनभेदाभ्यां तद्वद्वर्णान्प्रयोजयेत् ॥२५॥५॥ यथा सौराष्ट्रिका
नारी तक्रां इत्यभिभाषते । एवं रंगाः प्रयोक्तव्याः खे अराँ इव खेदया । रंगवर्णं प्रयुंजीरन्नो ग्रसेत्पू
र्वमक्षरं । दीर्घस्वरं प्रयुंजीयात्पश्चान्नासिक्यमाचरेत् । हृदये चैकमात्रस्त्वर्धमात्रस्तु मूर्धनि ।

 मध्येतुकंपयेत्कंपमुभौपार्श्वौसमौभवेत॥सरंगंकंपयेत्कंपंरथीवेतिनिदर्शनं॥२८

सा॰ नासिकायांतथार्धंचरंगस्यैवंद्विमात्रता॥हृदयादुत्करेतिष्ठन्कांस्येनसमनुस्वरं॥मार्दवंचद्विमा
त्रंचजघन्वाँइतिनिदर्शनं॥३०॥एवंवर्णाःप्रयोक्तव्यानाव्यक्तानचपीडिताः॥सम्यग्वर्णप्रयोगे
णब्रह्मलोकेमहीयते॥३१॥गीतीशीघ्रीशिरःकंपीतथालिखितपाठकः॥अनर्थज्ञोल्पकंठ
श्चषडेतेपाठकाधमाः॥माधुर्यमक्षरव्यक्तिःपदच्छेदस्तुसुस्वरः॥धैर्यंलयसमर्थंचषडेते
पाठकागुणाः॥शंकितंभीतिमुद्घुष्टमव्यक्तमनुनासिकं॥काकस्वरंशिरसिगंतथास्था
नविवर्जितं॥उपांशुदष्टंत्वरितंनिरस्तंविलंबितंगद्गदितंप्रगीतं॥निष्पीडितंग्रस्तपदा
क्षरंचवदेन्नदीनंनतुसानुनास्यं॥३५॥प्रातःपठेन्नित्यमुरःस्थितेनस्वरेणशार्दूलरुतोपमेन॥ २
मध्यंदिनेकंठगतेनचैवचक्राह्वसंकूजितसंनिभेन॥तारंतुविद्यात्सवनंतृतीयंशिरोगतंतच्च

स्वर

सदाप्रयोज्यं मयूरहंसान्यभृतः स्वराणां तुल्येन नादेन शिरः स्थितेन॥३१॥७॥ अचोस्पृ
ष्टा यणस्त्वीषन्नेमिस्पृष्टाः शरः स्मृताः। शेषास्स्पृष्टा हलः प्रोक्ता निबोधानुप्रदानतः॥ यमो
नुनासिका न ह्रो नादिनो हझषः स्मृताः॥ ईषन्नादा यणो जश्च श्वासिनस्तु खफादयः॥ ई
षच्छ्वासांश्चरो विद्याद्गोर्धामैतत्प्रचक्षते। दाक्षीपुत्रः पाणिनिना येनेदं व्यापितं भुवि॥ छंदः
पादौ तु वेदस्य हस्तौ कल्पोथ पठ्यते। ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते॥ शिक्षा घ्रा
अं ६ णं तु वेदस्य मुखं व्याकरणं स्मृतं। तस्मात्सांगमधीत्यैव ब्रह्मलोके महीयते॥४२॥८॥ उदा
त्तमाख्याति वृषोंगुलीनां प्रदेशिनीमूलनिविष्टमूर्ध्ना। उपांतमध्ये स्वरितं धृतं च कनि
ष्ठिकायामनुदात्तमेव॥ उदात्तं प्रदेशिनीं विद्यात्प्रचयं मध्यतोंगुलिं॥ निहतं तु कनिष्ठिकायां

२ष ग

शि॰ स्वरितोपकनिष्ठिकां॥ अंतोदात्तमाद्युदात्तमुदात्तमनुदात्तं नीचस्वरितं। मध्योदात्तं स्व
३॥ रितं द्व्युदात्तं त्र्युदात्तमिति नव पदशय्या॥ अग्निः सोमः प्रवो वीर्यं हविषां स्वर्बृहस्पतीरिंद्रा
बृहस्पती॥ अग्निरित्यंतोदात्तं सोम इत्याद्युदात्तं प्रेत्युदात्तं व इत्यनुदात्तं वीर्यं नीच स्वरि
तं बृहस्पतिरिति द्व्युदात्तमिंद्राबृहस्पती इति त्र्युदात्तं॥ अनुदात्तो हृदि ज्ञेयो मूर्ध्न्युदा
त्त उदाहृतः। स्वरितः कर्णमूलीयः सर्वास्ये प्रचयः स्मृतः॥ ४८॥१॥ चाषस्तु वदते मात्रां
द्विमात्रं त्वेव वायसः। शिखी रौति त्रिमात्रं तु नकुलस्त्वर्धमात्रिकं॥ कुतीर्थादागतं दग्धम ॥३
पवर्णं च भक्षितं॥ न तस्य पाठे मोक्षोस्ति पापाहिरिव किल्बिषात्। सुतीर्थादागतं व्यक्तं
स्वाम्नाय्यं सुव्यवस्थितं॥ सुस्वरेण सुवक्त्रेण प्रयुक्तं ब्रह्म राजते। मंत्रो हीनः स्वरतो वर्ण
हविर्भा मध्योदात्तं स्वरितिस्वरितं॥ ४८ तो वा मिथ्याप्रयुक्तो

चं द्वाद्विजः॥ सम्भवन्तिधनधान्यपशुपुत्रकीर्तिमान॥ तुलंचसुखंसमश्नुतेदिविकीर्तिर्दिवीकीर्ति॥ ६०॥
११॥ अथशिक्षामातृकामोदात्तश्चहकारंस्वराणांयथा॥ स्यचैचोरस्थोद्वात्तंचाषस्तुशं
करण्कादश॥ इतिशिक्षासमाप्त॥ ॥ ॥ ७ ॥ ७॥ ॐ॥ पंचसंवत्सरमयंयुगाध्यक्षं
प्रजापतिं॥ दिनर्त्वयनमासांगंप्रणम्यशिरसाशुचिः॥ १॥ प्रणम्यशिरसाकालमभिवाद्यसरस्वतीं॥
कालज्ञानंप्रवक्ष्यामिलगधस्यमहात्मनः॥ २॥ ज्योतिषामयनंकृत्स्नंप्रवक्ष्याम्यनुपूर्वशः॥
विप्राणांसंमतंलोकेयज्ञकालार्थसिद्धये॥ ३॥ निरेकंद्वादशार्द्धाब्दंद्विगुणंगतसंज्ञिकं॥
षष्ट्याषष्ट्यायुतंद्वाभ्यांपर्वणांराशिरुच्यते॥ ४॥ स्वराक्रमेतेसोमार्कौयदासाकंसवा
सवौ॥ स्यात्तदादियुगंमाघस्तपःशुक्लोदिनंत्यजः॥ ५॥ प्रपद्येतेश्रविष्ठादौसूर्याचां

तोवामिथ्याप्रयुक्तोनतमर्थमाह।सवाग्वज्रोयजमानंहिनस्तियथेंद्रशत्रुःस्वरतोपराधात्।अव
क्षरंहनायुष्यंविस्वरंव्याधिपीडितं।अक्षताशस्त्ररूपेणवज्रंपततिमस्तके।हस्तहीनंतुयोधीते
स्वरवर्णविवर्जितं।ऋग्यजुःसामभिर्दग्धोवियोनिमधिगच्छति।।हस्तेनवेदंयोधीतेस्वरवर्णार्थसं
युतं।ऋग्यजुःसामभिःपूतोब्रह्मलोकेमहीयते।।५५।।१०।।शंकरःशांकरींप्रादाद्दाक्षीपुत्रा
यधीमते।वाङ्मयेभ्यःसमाहृत्यदेवींवाचमितिस्थितिः।येनाक्षरसमाम्नायमधिगम्यमहेश्व
रात्।कृत्स्नंव्याकरणंप्रोक्तंतस्मैपाणिनयेनमः।येनधौतागिरःपुंसांविमलैःशब्दवारिभिः।त
मश्चाज्ञानजंभिन्नंतस्मैपाणिनयेनमः।अज्ञानांधस्यलोकस्यज्ञानांजनशलाकया।चक्षुरुन्
मीलितंयेनतस्मैपाणिनयेनमः।त्रिनयनमभिमुखनिःसृतामिमांयइहपठेत्प्रयतश्चस

द्वमसावुदक्। सार्पाद्ईदक्षिणार्कस्कृमा घस्रावपायोः सदा॥६॥ धर्मवृद्धिरपांप्रस्कुः
श्वपाद्धा सुदागतौ। दक्षिणेतौ। विपर्यस्तोषणमुदूर्सयनेनतु॥७॥ वसुस्त्वब्दौ॥ द्विगुणस
समंचाहुरयनाद्यंत्रयोदनं॥ चतुर्थं दशमंचैववृद्धिर्युग्माद्यंवकुलेप्यतौ॥८॥ वसुस्त्वब्दारभ
गाजश्र्यमित्रःसर्पाश्विनौजलं। धाताकश्चायनाद्याश्चाईपंचनभस्यस्त्वंशुतुः॥९॥ भांशाः
सुरष्टकांकार्याःपक्षाद्वादशचोद्गताः। एकादशगुणस्यानःअुके्ईचेंदवायद्दि॥१०॥ का
र्याभांशाष्टकास्थानेकला एकान्नविंशतिः। कुनस्थानेद्विसप्तती सद्भेपेद्न संमिताः॥११॥
च्यहंत्रीमशोषो दिवसांशभागश्चतुर्दशस्यात्पुपनीतसिन्नं। भाईधिके चाधिगतेपरें शोद्य
वृत्तमैकंनवकेंरवेद्यं॥१२॥ पक्षात्पत्तंचदशाझोईतदुक्तमितिनिर्दि। वाल। नवमिस्त कं न्वे तोंशस्य

शां॰च॰ द्वनांशान्यधिकेनतु॥१३॥ जौ शाघः स्वेभ्ये हीरो षाच्चिन्मुषण्यः सोमाधानः॥ रेभ्मृध्राश्वा ओजस्त
५ ब्वोह्रयेषाद्रूत्स्क्षालिंगेः॥१४॥ जाबाद्यंत्रौ समं विद्यात्पूर्वार्द्धे पार्वस्स्तरे॥ जौ बभाद्दानां शाम्
तुर्द्दशी काष्ठानां देविनाकला॥१५॥ कलादशाच्चविंशास्याद्विमहूर्त्तस्तुनाडिके॥ द्वित्रिंश
त्तत्कलानां तु षट्शती त्र्यधिकं भवेत्॥१६॥ नाडिके द्वे मुहूर्त्तस्तु पंचाशत्पलमाषकं॥ माषका
त्कुंभको द्रोणः कुटपैर्वर्धते त्रिभिः॥१७॥ स सप्त कुंभयुक् स्योनः सूर्योघो निंत्र योदश॥ नवम
निचपंचाद्भूः काष्ठाः पंचाशतरास्मृतः॥१८॥ माचिद्धाभ्यां गुणाभ्यस्तान्प्राग्विलग्नान्विनिर्दि
शेत्॥ सूर्यान्मासान्षड्भ्यस्तान्वियाद्वांद्रमसान्लवान्॥१९॥ अतीतपर्वभागेषु शो
धयेद्द्विगुणांतिथिं॥ तेषु मंडलभागेषु तिथिनिघ्नं गतो रविः॥२०॥ याः पर्वभादान

कृ॰ष्णोस्तासु सप्तगुणांतिथिं। प्रक्षिपेत्कृ॰ष्णा सप्तह स्त्रविद्याद्दाहानकीः कृ॰ष्णाः॥२१॥ यदु
णतरस्यायनं सौमायनंस्यात्तेषं तु यद्दक्षिणतो यनस्य॥ तदेव षष्ट्याहि युगाद्विभुक्तं सद्वादशांस्या
द्दिवसप्रमाणं॥२२॥ तदर्धदिनभागानां सदा पर्वणि पर्वणि। ऋतुशेषं तु तद्विद्यात्संख्या
य सह पर्वणां॥२३॥ इत्युपायसमुद्देशो भूयोप्येनं प्रकल्पयेत्। ज्ञेयराशिंगताभ्य
स्तान्विभजेत्ज्ञानराशिषु॥२४॥ अग्निः प्रजापतिः सोमो रुद्रोदितिर्बृहस्पतिः॥ सर्पा
श्च पितरश्चैव भगश्चैवार्यमापि च॥२५॥५॥ सवितात्वष्टाथ वायुश्चेंद्राग्नी मित्र एव च। इं
द्रो निर्ऋतिरापो वै विश्वेदेवास्तथैव च। विष्णुर्वसवो वरुणोज एकपात्तथैव च। अहिर्बु
ध्न्यस्तथा पूषाश्विनौ यम एव च॥७॥ नक्षत्रदेवता एता एताभिर्यज्ञकर्मणि। यजमा

नक्षत्रास्स्वदैर्नामनक्षत्रजं स्मृतं ॥२८॥ इत्येतन्मासवर्षाणां मुहूर्तोदयपर्वणां । दिनर्त्वय
नमासांगं व्याख्यातं लगधोऽब्रवीत् ॥२९॥ सोमसूर्यस्त्रिचरितं लोकं लोके च संमितं । सोमसूर्यस्त्रि
चरितं विद्वान्वेदविदश्नुते ॥३०॥ विषुवं तद्गुणं द्वाभ्यां रूपहीनं तु षड्गुणं । यल्लब्धं तानि पर्वाणि
तथोर्ध्वं सा तिथिर्भवेत् ॥३१॥ माघशुक्लप्रपन्नस्य पौषकृष्णसमापिनः । युगस्य पंचवर्षस्य का
लज्ञानं प्रचक्षते । तृतीयां नवमीं चैव पौर्णमासीं त्रयोदशीं । षष्ठीं च विषुवान्प्रोक्तो द्वादश्यां
च समं भवेत् ॥३२॥ चतुर्दशीमुपवसथस्तथा भवेद्यथोदितो दिनमुपैति चंद्रमाः । माघशुक्ला
ह्निको युंक्ते श्रविष्ठायां च वार्षिकीं । यथा शिखा मयूराणां नागानां मणयो यथा । तद्वद्वेदां
गशास्त्राणां ज्योतिषं मूर्धनि स्थितं ॥३४॥७॥ वेदा हि यज्ञार्थमभिप्रवृत्ताः कालानुपूर्वा

विहिताश्च यज्ञाः। तस्मादिदं कालविधानशास्त्रं यो ज्योतिषं वेद स वेद यज्ञान्। यो ज्योतिषं वेद स
वेद यज्ञानिति॥ पंचसंवत्सरं प्रपद्येते कार्यः कलादशात्वयाः पर्वसावित्ताविषुवं सप्त॥ ७ ॥
वेदव्यासाय नमः॥ भार्गवनामाय नमः॥ ॥ श्रीकुमूमसयरसतजभनलगसंमितं भ्रमति
वाङ्मयं जगति यस्य॥ स जयति पिंगलनागः शिवप्रसादाद्विशुद्धमतिः॥ १॥ त्रिगुरुं वि
द्धि मकारं लघ्वादिसमन्वितं यकाराख्यं॥ लघुमध्यमं तु रेफं सकारमंते गुरु निबद्धं
॥२॥ लघ्वंत्यं हि तकारं जकारमुभयोर्लघुं विजानीयात्॥ आदिगुरुं च भकारं कथितं नका
६ रमिह पैंगले त्रिलघुं॥ ३॥ दीर्घं संयोगपरं तथा प्लुतं व्यंजनांतमूष्मांतं॥ सानुस्वारं च गुरुं
क्वचिदवसानेपि लघ्वंत्यं॥ ४॥ आदिमध्यावसानेषु यरता यांति लाघवं। भजसा गौरव

छं० द्वि:
७॥

यांतिमनौ तु गुरु लघ्वं ॥ ५ ॥ त्रिविरामदशावर्णां षण्मात्रमुवाच पिंगलः सूत्रं ॥ छंदो वर्णं
पदार्थप्रत्ययहेतोश्चरास्त्वादौ ॥ ६ ॥ १ ॥ धी श्री स्त्री म् । वरा सा य् । का गुहा र् । वसुधा स् । सा
कृता त् । काहा सज् । गं किं वद् । भ । नहसन् । मृलू । गं ते । भादि पर ॥ हे लो सं । म्रौ । अष्टौ वसव
इति । २ ॥ इति प्रथमोध्यायः ॥ छंदः ॥ गायत्र्या दैव्येकं । आसुरी पंचदश । प्राजापत्याष्टौ । यजु
षां षट् । साम्नां द्विः । ऋचां त्रिः । द्वौ द्वौ साम्नां वर्द्धते त्रीं त्रीनृचां । चतुरश्चतुरः प्राजापत्यायाः । एकैकं
शेषे । जह्यादासुरी ॥ तान्युष्णिगनुष्टुब्बृहतीपंक्तित्रिष्टुब्जगत्यः । तिस्रस्तिस्रः समानाम एकैका ब्राह्म
ण्य जुषामार्ष्य इति ॥ ३ ॥ द्वितीयोध्यायः । पादः । इयादिपूरणः । गायत्र्या वसवः । जगत्या आदि
त्याः ॥ विराजो दिशः ॥ त्रिष्टुभो रुद्राः ॥ एकद्वित्रिचतुष्पादुक्तपादं ॥ आद्यं चतुष्पाद् ऋतुभिः । क

[illegible]पादैर्भिः ॥ सापादनिचृत ॥ षट्कसप्तकयोर्मध्येष्टावतिपादनिचृत । द्वौ नवकौ षट्कश्च सा
नाम्नी ॥ विपरीता वाराही ॥ षट्कसप्तकाष्टकैर्वर्धमाना ॥ विपरीता प्रतिष्ठा ॥ तृतीयं द्विपाज्जा
गतगायत्राभ्यां ॥ त्रिपात्त्रैष्टुभैः ॥ उष्णिग्गायत्रौ जागतश्च ॥ ककुम्मध्ये चेदन्त्यः ॥ पुरउष्णिक्पु
रः ॥१॥ परोष्णिक्परः ॥ चतुष्पादृषिभिः ॥ अनुष्टुप्गायत्रैः ॥ त्रिपात्क्वचिज्जागताभ्यां च मध्ये
न्ते च ॥ बृहती जागतस्त्रयश्च गायत्राः ॥ पथ्या पूर्वश्चेत्तृतीयः ॥ न्यंकुसारीली द्वितीयः ॥ स्कंधो
ग्रीवी क्रौष्टुकेः ॥ उरोबृहती यास्कस्य ॥ उपरिष्टाद्बृहत्यन्ते ॥ पुरस्ताद्बृहती पुरः ॥ क्वचिन्नवका
श्चत्वारः ॥ वैराजौ गायत्रौ च ॥ त्रिभिर्जागतैर्महाबृहती ॥ सतोबृहती ताण्डिनः ॥ पंक्तिर्जाग
तौ गायत्रौ च ॥ पूर्वौ चेदयुजौ सतःपंक्तिः ॥ विपरीतौ च ॥ आस्तारपंक्तिः परतः ॥२॥ प्रस्तारपंक्तिः ॥

पुरतः। विष्टार पङ्क्ति रन्तः। संस्तार पङ्क्ति र्बहिः। अक्षर पङ्क्तिः पंचकाश्चत्वारः। द्वावप्यल्पशः। पद पङ्क्तिः पं
च। चतुष्कषट्कौ त्रयश्च। पथ्या पंच भिर्गायत्रैः। जगती षड्भिः। एकेन त्रिष्टुप् ज्योतिष्मती। तथा जगती।
पुरस्ता ज्ज्योतिः। प्रथमेन मध्ये ज्योति र्मध्यमेन। उपरिष्टा ज्ज्योति रन्त्येन। एकस्मिन् पंचके छंदः। शंकु
मती। षट्के ककुम्मती। त्रिपादणिष्ठ मध्या पिपीलिक मध्या विपरीता यवमध्या। ऊनाधिकेनैकेन
निचृद्भुरिजौ। द्वाभ्यां विराट्स्वराजौ। आदितः संदिग्धे। ॥ देवतादितश्च। अग्निः सविता सोमो बृह
स्पति र्मित्रावरुणा विंद्रो विश्वे देवा देवताः। स्वराः षड्ज ऋषभ गांधार मध्यम पंचम धैवत निषा
१३ दाः। सित सारंग पिशंग नील लोहित पिंग गौरा वर्णाः। आग्निवेश्य काश्यप गौतमाङ्गिरस भा
र्गव कौशिक वासिष्ठा नि गोत्राणि। इत्यामान्यानि छंदांसि रोचनाभाः कृतयः। अनुक्तानां का

भ्नौ ज्लौ ३

छ॰: विपुलायुग्लः सप्तमः॥ सर्वतः सैतवस्य भ्नौ न्तौ च प्रतिपादं चतुर्दश्यापदमनुरूप्यें। गावंत
आपीडः ११ गावाद्दो वेत्प्रत्यापीडः प्रत्यापीडो गा वाद्दो च॥ अथ मस्या विपर्यासे मंजरील वत्न्यु
मृतधाराः उद्गतामेकतः स्जौ स्लौ न्सौ जौ ग स्जौ स्जौ ग॥ तृतीयस्य सौरभकं नौ भ्गौ॥ ललितं नौ
सौ॥ उपस्थितप्रचुपितम् प्रथमाद्यं म्सौ ज्भौ गौ स्नौ ज्यौ म्रौ स्नौ जौ य॥ वर्द्धमानं तृतीये नौ स्नौ न्सौ॥
शुद्धविराडृषभं त्जौ रा ग अर्धे उपचित्रकं सौ स्लौ ग भौ भौ ग ग॥ द्रुतमध्या भौ भौ ग ग न्जौ ज्यौ॥ वेगव
ती सौ सौ भौ भौ ग ग॥ भद्रविराट् त्जौ गौ म्सौ जौ ग ग केतुमती स्जौ सौ भ्नौ नौ ग ग। आख्यानकी
तौ ज्गौ ग ग ज्तौ ज्गौ ग ग विपरीताख्यानकी ज्तौ ज्गौ ग्तौ ज्गौ ग ग। हरिणप्लुता सौ स्लौ ग न्भौ भ्रौ अप र
रवक्त्रं नौ र्लौ ग न्जौ ज्रौ पुष्पिताग्रा नौ र्यौ न्जौ ज्रौ ग १२ यवमती ज्रौ ज्रौ ज्रौ ज्रौ ग विरवका

र॰ स्त
१०॥

न्त्रिंशदेकान्त्रिनृदंतेग॥ रंवजामहत्तायुजीति॥१३॥ पंचमोऽध्यायः॥ यतिविच्छेदः॥ तनुमध्यात्यौ॥
कुमारललिताज्सौग॥ मापावकाक्रीडितकं म्नौल्गौ॥ चित्रपदाभौगौ॥ विद्युन्मालामौगौ॥ भु
जगशिशुसृतानौमः॥ हलमुखीर्नौस॥ शुद्धविराण्मसौजौ॥ पणवोम्नौय्गौ॥ रुक्मवती भ्मौ
स्गौ॥ मयूरसारीर्जौर्गौ॥ मत्ताम्भौस्गौ॥ उपस्थितात्जौज्गौ॥ एकरूपं सौज्गौग॥ इंद्रवज्रा
तौज्गौग॥ उपेंद्रवज्राज्तौज्गौग॥ बाद्यंतावुपजातयः॥ दोधकं भौभ्गौग॥ शालिनी म्तौतगौ
गसमुद्रऋषयः॥१४॥ वातोर्मी म्भौत्गौग॥ भ्रमरविलसितं म्भौन्लौग॥ रथोद्धता न्रौल्गौ
ग॥ स्वागता र्नौभ्गौग॥ हंसास्तौग॥ श्येनी र्जौर्लौग॥ जगती॥ वंशस्थाज्तौज्रौ॥ इंद्रवंशा तौज्रौ॥ २
द्रुतविलंबितं न्भौभ्रौ॥ तोटकं सः॥ पुटोनौम्यौ वसुसमुद्राः॥ जलोद्धतगतिर्ज्सौज्सौ रसर्तु